0649CH04

चतुर्थः पाठः

# विद्यालयः



एषः विद्यालयः।
अत्र छात्राः शिक्षकाः,
शिक्षिकाः च सन्ति।



एषा सङ्गणकयन्त्र-प्रयोगशाला अस्ति।
एतानि सङ्गणकयन्त्राणि सन्ति।



एतत् अस्माकं विद्यालयस्य
उद्यानम् अस्ति।
उद्याने पुष्पाणि सन्ति।
वयम् अत्र क्रीडामः पठामः च।

© NCERT not to be republished





ऋचा – तव नाम किम्?
प्रणवः – मम नाम प्रणवः। तव नाम किम्?
ऋचा – मम नाम ऋचा। त्वं कुत्र पठसि?
प्रणवः – अहम् अत्र एव पठामि।
ऋचा – अहम् अपि अत्र एव पठामि।
इदानीम् आवां मित्रे स्वः।

शिक्षिका – छात्राः! यूयं किं कुरुथ?
छात्राः – आचार्ये! वयं गच्छामः।
शिक्षिका – यूयं कुत्र गच्छथ।
छात्राः – वयं सभागारं गच्छामः।
शिक्षिका – युष्माकं पुस्तकानि कुत्र सन्ति?
छात्राः – अस्माकं पुस्तकानि अत्र सन्ति।





शिक्षकः– छात्रौ! युवां किं कुरुथः?
छात्रौ – आचार्य! आवां श्लोकं गायावः।
शिक्षकः – शोभनम्, किं युवां श्लोकं न लिखथः?
छात्रौ – आवां लिखावः, पठावः, गायावः, चित्राणि अपि रचयावः।
शिक्षकः– बहुशोभनम्?

not to be republished © NCERT



## शब्दार्थाः



| | | |
|---|---|---|
| **सङ्गणकयन्त्राणि** – | (अनेक) कम्प्यूटर | computer |
| **अस्माकम्** – | हमारा/हम लोगों का | our |
| **वयम्** (सर्वनाम) – | हम सब | we |
| **तव** – | तेरा | your |
| **मम्** – | मेरा | my/mine |
| **त्वम्** (सर्वनाम) – | तुम | you |
| **अहम्** (सर्वनाम) – | मैं | I/my self |
| **एव** (अव्यय) – | ही | only |
| **अपि** (अव्यय) – | भी | also |
| **इदानीम्** (अव्यय) – | अब/इस समय | now |
| **आवाम्** (सर्वनाम) – | हम दोनों | we two |
| **मित्रे** (नपुं) – | (दो) मित्र | two friends |
| **स्वः** – | (हम दोनों) हैं | (we two) are |
| **यूयम्** (सर्वनाम) – | तुम सब | you (all) |
| **आचार्ये!** – | शिक्षिका (सम्बोधन) | oh teacher! |
| **युष्माकम्** – | तुम्हारा/तुम लोगों का | your/of you (all) |
| **कुत्र** – | कहाँ | where |
| **सभागारम्** – | सभागार को | to the assembly/auditorium |
| **युवाम्** (सर्वनाम) – | तुम दोनों | you two |
| **आचार्य!** – | गुरु/शिक्षक (सम्बोधन) | oh teachre! |
| **शोभनम्** – | अच्छा | good/fine |
| **गायावः** – | (हम दो) गाते हैं/गाती हैं | we two sing/are singing |
| **रचयावः** – | (हम दो) बनाते हैं/बनाती है | we two make/are making |

© NCERT not to be republished







## अभ्यासः

**1. उच्चारणं कुरुत।**

| | | |
|---|---|---|
| अहम् | आवाम् | वयम् |
| माम् | आवाम् | अस्मान् |
| मम | आवयोः | अस्माकम् |
| त्वम् | युवाम् | यूयम् |
| त्वाम् | युवाम् | युष्मान् |
| तव | युवयोः | युष्माकम् |

**2. निर्देशानुसारं परिवर्तनं कुरुत-**

**यथा-** अहं पठामि। – (बहुवचने) – **वयं पठामः।**

(क) अहं नृत्यामि। – (बहुवचने) – ...............................

(ख) त्वं पठसि। – (बहुवचने) – ...............................

(ग) युवां क्रीडथः। – (एकवचने) – ...............................

(घ) आवां गच्छावः। – (बहुवचने) – ...............................

(ङ) अस्माकं पुस्तकानि। – (एकवचने) – ...............................

(च) तव गृहम्। – (द्विवचने) – ...............................

© NCERT not to be republished





## 3. कोष्ठकात् उचितं शब्दं चित्वा रिक्तस्थानानि पूरयत-

(क) .............................. पठामि। (वयम्/अहम्)

(ख) .............................. गच्छथः। (युवाम्/यूयम्)

(ग) एतत् .............................. पुस्तकम्। (माम्/मम)

(घ) .............................. क्रीडनकानि। (युष्मान्/युष्माकम्)

(ङ) .............................. छात्रे स्वः। (वयम्/आवाम्)

(च) एषा.............................. लेखनी। (तव/त्वाम्)

## 4. क्रियापदैः वाक्यानि पूरयत-

| | | | | | |
|---|---|---|---|---|---|
| पठसि | धावामः | गच्छावः | क्रीडथः | लिखामि | पश्यथ |

**यथा-** अहं पठामि।

(क) त्वं ..............................

(ख) आवां ..............................

(ग) यूयं ..............................

(घ) अहं ..............................

(ङ) युवां ..............................

(च) वयं ..............................

© NCERT not to be republished



## 5. उचितपदैः वाक्यनिर्माणं कुरुत-

| | | | | | |
|---|---|---|---|---|---|
| मम | तव | आवयोः | युवयोः | अस्माकम् | युष्माकम् |

यथा- एषा **मम** पुस्तिका।

(क) एतत् .............................. गृहम्।

(ख) .............................. मैत्री दृढा।

(ग) एषः .............................. विद्यालयः।

(घ) एषा .............................. अध्यापिका।

(ङ) भारतम् .............................. देशः।

(च) एतानि .............................. पुस्तकानि।

## 6. एकवचनपदस्य बहुवचनपदं, बहुवचनपदस्य एकवचनपदं च लिखत-

यथा- एषः – एते

(क) सः – ......................

(ख) ताः – ......................

(ग) एताः – ......................

(घ) त्वम् – ......................

(ङ) अस्माकम् – ......................

(च) तव – ......................

(छ) एतानि – ......................

© NCERT not to be republished





## 7. (क) वार्तालापे रिक्तस्थानानि पूरयत-

**यथा-** प्रियंवदा – शकुन्तले! **त्वं** किं करोषि?

**शकुन्तला** – प्रियंवदे! .............. नृत्यामि, .............. किं करोषि?

प्रियंवदा – शकुन्तले! .............. गायामि। किं ..............न गायसि?

**शकुन्तला** – प्रियंवदे! .............. न गायामि। .............. तु नृत्यामि।

प्रियंवदा – शकुन्तले! किं ............. माता नृत्यति।

**शकुन्तला** – आम्, ............. माता अपि नृत्यति।

प्रियंवदा – साधु, ............. चलावः।

## (ख) उपयुक्तेन अर्थेन सह योजयत-

| शब्दः | अर्थ |
|---|---|
| सा | तुम दोनों का |
| तानि | तुम सब |
| अस्माकम् | मेरा |
| यूयम् | वह (स्त्रीलिङ्ग) |
| आवाम् | तुम्हारा |
| मम | वे (नपुंसकलिङ्ग) |
| युवयोः | हम दोनों |
| तव | हमारा |

© NCERT not to be republished

